# टिळक महाराष्ट्र विद्यापीठ, पुणे

**24E/23E NEP**

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२५**

**सत्र २ रे/सत्र ४ थे**

**विषयः कुमारसम्भव (24E423/23E441)**

| दिनांक :१५/०५/२०२५ | गुण : १०० | वेळ : स. १०.०० ते दु. १.०० |
|---|---|---|

**सूचना : केषामपि पञ्चाणां प्रश्नानां सविस्तरम् उत्तरं लेखनीयम्।**

**प्र.१. स्वभाषया पञ्चानामनुवादं कुरुत।** **३५**

१) भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिशण्डिबर्हः ।।

२) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

३) प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः

४) अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः।

५) स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना ।।

६) पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ।

७) महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले॥

**प्र.२. ससन्दर्भं चतुर्णां स्पष्टीकुरुत।** **२८**

१) न धर्मवृद्धेषु वयः समीक्ष्यते।

२) अद्यप्रभृति तवास्मि दासः।

३) शशाक मेना न नियन्तुमुद्यमात्।

४) ध्रुवं वपुः काञ्चनपद्मनिर्मितम्।

५) क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ।

६) पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये।

**प्र.३. सविस्तरं द्वयं लिखत।** **२४**

१) पार्वत्याः उग्रतपस आचरणं सविस्तरं विवृणुत।

२) पार्वती-बटुसंवादस्य महत्त्वं वैशिष्ट्यानि च स्पष्टीकुरुत।

३) पञ्चमाङ्कस्य रसग्रहणं कुरुत।

४) हिमालयवर्णनं लिखत।

**प्र.४. रूपपरिचयं लिखत।** ०५

ताड्यमाना उपयेमे तिरस्करिण्यः चचार प्रजल्पितायाम्

**प्र.५. समासविग्रहं करणीयम्।** **०५**

मुक्ताकलापस्य मुनिव्रतात् सुकेशी असंभृतम् अनुरूपाम्

**प्र.६. सन्धिविग्रहं कुरुत।** **०३**

क्रीतस्तपोभिरिति कलावतस्त्वमस्य किमित्यपास्याभरणानि

----------